[A]जनः, [1]प्रजनिष्णुः,[B] [2]जज्ञिः, [3]विजावा-विजावानौ-विजावानः, विजावरी, [4]जन्यः, [5]मन्दुरजः, [6]प्रावृषिजः-शरदिजः-कालेजः-[C] दिविजः, [7]सरसिजम्-सरोजम्, [8]वर्षेजः-वर्षजः-क्षरेजः-क्षरजः-शरेजः-शरजः-वरेजः-वरजः, [9]संस्कारजः-अदृष्टजः, [10]प्रजा-अनुजः,[D] [11]बीजम्-

---

1. 'अलंकृञ्निराकृञ्प्रजनोत्पद—' (3-2-136) इत्यादिना तच्छीलादिषु कर्तृषु प्रोपसृष्टादस्मात् इष्णुच् प्रत्ययः।
2. 'भाषायां धाञ्कृसृगमिजनिनमिभ्यः—' (वा. 3-2-171) इति लिटः किः किन् वा आदेशः। लिड्वद्भावात् 'लिटि धातोरनभ्यासस्य' (6-1-8) इति द्विर्वचनम्। ताच्छीलिकोऽयं प्रत्ययः। अभ्यासकार्यम्। 'गमहनजनखनघसां लोपः क्ङित्यनङि' (6-4-98) इत्युपधालोपः। 'स्तोः श्चुना श्चुः' (8-4-40) इति श्चुत्वम्।
3. 'अन्येभ्योऽपि दृश्यन्ते' (3-2-75) इति वनिप्प्रत्यये, 'विड्वनोरनुनासिकस्यात्' (6-4-41) इत्यात्वे, सवर्णदीर्घे, 'नलोपः प्रातिपदिकान्तस्य' (8-2-7) इति नकारलोपे, रूपम्। नकारान्तोऽयं शब्दः। स्त्रियाम्, 'वनो र च' (4-1-7) इति ङीब्रेफौ भवतः।
4. 'भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्यापात्या वा' (3-4-68) इति कर्तरि यत्प्रत्ययान्तो निपातितः। पक्षे भावेऽप्ययं प्रत्ययः।
5. 'सप्तम्यां जनेर्डः' (3-2-97) इति डप्रत्ययः। 'ङ्यापोः संज्ञाच्छन्दसोर्बहुलम्' (6-3-63) इति पूर्वपदस्य ह्रस्वः।
6. 'प्रावृट्शरत्कालदिवां जे' (6-3-15) इति सप्तम्या अलुक्।
7. 'तत्पुरुषे कृति बहुलम्' (6-3-14) इति वा सप्तम्या अलुक्।
8. 'विभाषा वर्षक्षरशरवरात्' (6-3-16) इति विभाषया सप्तम्या अलुक्।
9. 'पञ्चम्यामजातौ' (3-2-98) इति डप्रत्ययः।
10. 'उपसर्गे च संज्ञायाम्' (3-2-99) इति डप्रत्ययः।
11. विशेषेण जायते इति बीजम्। 'उपसर्गे च संज्ञायाम्' (3-2-99) इति डप्रत्ययः। 'कृञो द्वितीयतृतीयशम्बबीजात् कृषौ' (5-4-58) इत्यत्र, 'बीज' इति निर्देशात्, पृषोदरादित्वेन (6-3-109) 'वि' इत्युपसर्गस्य दीर्घः, वकारस्य बकारादेशः।

A. 'तावज्जनित्वा व्रजनाथपत्न्या मनो जनस्याभिनिविश्य देव्या।' वा. वि. 3.39.
B. 'तर्पणं प्रजनिष्णूनां सस्यानाममलं पयः।' भ. का. 7. 2.
C. 'अवश्यलाव्या दिविजा ममाय ये खेचरीं वाचमुदैरिरंस्ताम्।
नूनं गृहेशूर इतीमके मां क्षिपन्ति वर्षेजजलानिवार्यम्॥' वा. वि. 2.18.
D. 'मन्ये किञ्जमहं घ्नन्तं त्वामक्षत्रियजे रणे।
लक्ष्मणाधिज दुर्वृत्तं प्रयुक्तमनुजेन नः॥' भ. का. 6.136.